श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः
श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

श्री मेल्पत्तूर् नारायणभट्टतिरि विरचितम्

# ॥ श्रीमन्नारायणीयम् ॥

## दशक - ४

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the Wikner font.

श्रीः

श्रीमते कृष्णाय परब्रह्मणे नमः

श्रीमते रामानुजाय नमः

# ॥ श्रीमन्नारायणीयम् ॥

## दशक - ४

*अष्टाङ्गयोगवर्णनं योगसिद्धिवर्णनं च*

कल्यतां मम कुरुष्व तावतीं
    कल्यते भवदुपासनं यया।
स्पष्टमष्टविधयोगचर्यया
    पुष्टयाशु तव तुष्टिमाप्नुयाम्॥ १ ॥

ब्रह्मचर्यदृढतादिभिर्यमै-
    राप्लवादिनियमैश्च पाविताः।
कुर्महे दृढममी सुखासनं
    पङ्कजाद्यमपि वा भवत्पराः॥ २ ॥

तारमन्तरनुचिन्त्य सन्ततं
    प्राणवायुमभियम्य निर्मलाः।
इन्द्रियाणि विषयादथापहृ-
    त्यास्महे भवदुपासनोन्मुखाः॥ ३ ॥

अस्फुटे वपुषि ते प्रयत्नतो
    धारयेम धिषणां मुहुर्मुहुः।
तेन भक्तिरसमन्तरार्द्रता-
    मुद्वहेम भवदङ्घ्रिचिन्तकाः॥ ४ ॥

विस्फुटावयवभेदसुन्दरं
    त्वद्वपुस्सुचिरशीलनावशात्।
अश्रमं मनसि चिन्तयामहे
    ध्यानयोगनिरतास्त्वदाश्रयाः॥ ५ ॥

www.prapatti.com

ध्यायतां सकलमूर्तिमीदृशी-
    मुन्मिषन्मधुरताहृतात्मनाम्।
सान्द्रमोदरसरूपमान्तरं
    ब्रह्मरूपमयि तेऽवभासते॥ ६॥

तत्समास्वदनरूपिणीं स्थितिं
    त्वत्समाधिमयि विश्वनायक।
आश्रिताः पुनरतः परिच्युता-
    वारभेमहि च धारणादिकम्॥ ७॥

इत्थमभ्यसननिर्भरोल्लस-
    त्त्वत्परात्मसुखकल्पितोत्सवाः।
मुक्तभक्तकुलमौलितां गताः
    सञ्चरेम शुकनारदादिवत्॥ ८॥

त्वत्समाधिविजये तु यः पुन-
    र्मङ्क्षु मोक्षरसिकः क्रमेण वा।
योगवश्यमनिलं षडाश्रयै-
    रुन्नयत्यज सुषुम्नया शनैः॥ ९॥

लिङ्गदेहमपि संत्यजन्नथो
    लीयते त्वयि परे निराग्रहः।
ऊर्ध्वलोककुतुकी तु मूर्धतः
    सार्धमेव करणैर्निरीयते॥ १०॥

अग्निवासरवलर्क्षपक्षगै-
    रुत्तरायणजुषा च दैवतैः।
प्रापितो रविपदं भवत्परो
    मोदवान् ध्रुवपदान्तमीयते॥ ११॥

आस्थितोऽथ महरालये यदा
    शेषवक्त्रदहनोष्मणार्द्यते।

ईयते भवदुपाश्रयस्तदा
वेधसः पदमतः पुरैव वा॥ १२॥

तत्र वा तव पदेऽथवा वसन्
प्राकृतप्रलय एति मुक्तताम्।
स्वेच्छया खलु पुरा विमुच्यते
संविभिद्य जगदण्डमोजसा॥ १३॥

तस्य च क्षितिपयोमहोऽनिल-
द्योमहत्प्रकृतिसप्तकावृतीः।
तत्तदात्मकतया विशन् सुखी
याति ते पदमनावृतं विभो॥ १४॥

अर्चिरादिगतिमीदृशीं व्रजन्
विच्युतिं न भजते जगत्पते।
सच्चिदात्मक भवद्गुणोदया-
नुच्चरन्तमनिलेश पाहि माम्॥ १५॥

**********



www.prapatti.com